## २ – उपधायाम् अपि गुणः, सूत्रसहिता दृष्टिः

भ्वादिगणे, अवस्थाद्वये गुणः भवति इति अस्माभिः दृष्टम् |
अ) भ्वादिगणे, धातोः अन्ते इक्–वर्णः (इ, ई, उ, ऊ, ऋ, ॠ) अस्ति चेत्, तस्य वर्णस्य गुणः भवति |
 यथा— भू → भो, जि → जे, सृ → सॄ
आ) भ्वादिगणे, धातोः उपधायां लघु इक्–वर्णः (इ, उ, ऋ) अस्ति चेत्, तस्य वर्णस्य गुणः भवति | उपधा नाम अन्तिमवर्णात् पूर्वं यः वर्णः, सः |
 यथा— बुध् → बोध्, कृष् → कर्ष्
अत्र बुध्–धातौ उकारः उपधा–संज्ञकः; कृष्–धातौ ऋकारः उपधा–संज्ञकः |

गते पाठे प्रथमदशायाम् (इगन्त–अवस्थायां) गुणः कथं भवति इति अस्माभिः दृष्टम् | यस्य धातोः अन्तिमवर्णः इ, ई, उ, ऊ, ऋ, ॠ, ऌ (नाम इक्–प्रत्याहारे कश्चन वर्णः), सः धातुः इगन्तः धातुः | सार्वधातुक–प्रत्यये परे, इगन्तधातोः अङ्गस्य इकः गुणः, **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन सूत्रेण |

इदानीं द्वितीयदशायाम् (इक्–उपधा–अवस्थायां) गुणः कथं भवति इति पश्याम | अवगमनार्थं लघुकथा (सङ्क्षिप्ता दृष्टिः) अपि अस्ति, पूर्णदृष्टिः अपि अस्ति | आदौ लघुकथाम् अवलोकयाम |

लघु कथा

१. बुध् → बोधति | अत्र **उकारः** = ह्रस्वः, बुध्–धातोः उपधायाम्, इक्–प्रत्याहारस्य सदस्यः च | अस्याम् अवस्थायां बुध्–धातुः भ्वादिगणे सन्, उकारस्य गुणः | शप्–विकरणप्रत्ययः एव कारणम् | किमर्थम् इति चेत्—

२. **पुगन्तलघूपधस्य च** (७.३.८६) = धातोः उपधायां लघु–इक् चेत्, तस्य गुणः भवति सार्वधातुके परे (सार्वधातुक–संज्ञक–प्रत्ययः धातोः अनन्तरम्) |

३. बुध् + शप् + ति → शप् 'शित्' अस्ति अतः 'सार्वधातुकम्'; अतः **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन उकारस्य गुणः → बोधति |

पूर्णा कथा

१. बुध् [लट्–लकार–विवक्षा (वक्तुम् इच्छा) → लट्–प्रत्ययः विधीयते]
२. बुध् + लट् [लट्–स्थाने प्रथमपुरुषैकवचने तिप् प्रत्ययस्य आदेशः]
३. बुध् + तिप् [**हलन्त्यम्** इत्यनेन सूत्रेण पकारस्य इत्संज्ञा; **तस्य लोपः** इत्यनेन पकार–लोपः]
४. बुध् + ति [**तिङ्शित् सार्वधातुकम्** (३.४.११३) इत्यनेन ति 'तिङ्' अतः सार्वधातुक–संज्ञकः]
[**कर्तरि शप्** इत्यनेन सूत्रेण कर्तरि अर्थे "ति" इति सार्वधातुके परे, शप्–प्रत्ययः विहितः]
५. बुध् + शप् + ति [**लशक्वतद्धिते** इत्यनेन सूत्रेण ल्, श्, क–वर्गे स्थिते वर्णानां इत्संज्ञा प्रत्ययस्य आदौ, तद्धित प्रत्ययः नास्ति चेत्]
[**हलन्त्यम्** इत्यनेन सूत्रेण पकारस्य इत्संज्ञा; **तस्य लोपः** इत्यनेन शकार–पकारयोः लोपः]
६. बुध् + अ + ति

**पुगन्तलघूपधस्य च** – पूर्वतने पाठे अस्माभिः दृष्टं यत् 'अ', 'शप्' इत्यस्य प्रतिनिधिः | शकारपकारयोः लोपः भवति, किन्तु तयोः लक्षणं तिष्ठति एव | शकारस्य इत्–संज्ञा अतः अवशिष्टः अकारः शित् अस्ति | शित् अस्ति अतः **तिङ्शित् सार्वधातुकम्** इत्यनेन सूत्रेण शप् (अधुना अकारः) सार्वधातक–संज्ञक–प्रत्ययः | तदा **पुगन्तलघूपधस्य च** इत्यनेन सूत्रेण धातौ उपधायाः ह्रस्व–इकः गुणः भवति |

७. बोध् + अ + ति [वर्णमेलने]
८. बोधति

<u>"बुध् + शप् + ति" इति प्रसङ्गे **पुगन्तलघूपधस्य च** (७.३.८६) इत्यस्य अर्थः</u>

१. "पुगन्तस्य लघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः" [अनुवृत्ति–सहितं सूत्रम्]
२. "पुगन्तस्य" इति भागम् अधः* अवलोकयाम | बुध्–धातोः कृते प्रसङ्गः नास्ति |
३. "**लघूपधस्य अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः**" इति अस्माकं कृते मुख्यः भागः अत्र |
४. लघ्वी + उपधा (लघु = ह्रस्वः वर्णः; लघ्वी इति लघु–शब्दः स्त्रीलिङ्गे)
५. लघ्वी + उपधा → लघूपधा (= ह्रस्वा इक्–उपधा; ह्रस्व इक् = इ, उ, ऋ) | बुध्–धातौ, लघूपधा नाम बुध्–धातोः ह्रस्व–उकारः |
६. लघूपधस्य = लघ्वी उपधा यस्य तत् लघूपधम् बहुव्रीहिः, तस्य लघूपधस्य | तस्य लघूपधस्य अङ्गस्य | प्रत्ययात् पूर्वं यः संपूर्णभागः, सः तस्य प्रत्ययस्य अङ्गम् | अत्र शप् इति प्रत्ययः; तस्मात् प्रत्ययात् पूर्वं बुध्–धातुः, अतः बुध्–धातुः शप्–प्रत्ययस्य अङ्गम् | बुध्–धातौ लघूपधा (ह्रस्वः उकारः) अपि अस्ति, अतः बुध्–धातुः स्वयं लघूपधम् | आहत्य बुध्–धातुः शप्–प्रत्ययस्य लघूपधम् अङ्गम् |
७. सार्वधातुकार्धधातुकयोः इति सप्तम्यन्तं पदम् | पाणिनीय–सूत्रेषु सप्तमीविभक्तिः इत्युक्तौ पूर्वकार्यम् | अतः सार्वधातुक–संज्ञक–प्रत्ययात् पूर्वं (नाम शप् प्रत्ययात् पूर्वम्) लघूपधम् (नाम बुध्–धातुः) अस्ति चेत, तस्य अङ्गस्य (नाम बुध्–धातोः) लघ्वी–उपधायाः इकः (इक् षष्ठीविभक्तिः = इकः; नाम उकारस्य) गुणः भवति | अतः उकारस्य स्थाने ओकारादेशः | बुध् + शप् + ति → बोधति |

<u>भ्वादिगणे अन्यानि उदाहरणानि – **पुगन्तलघूपधस्य च** (७.३.८६)</u> —
शुच् → शोचति (शोकम् अनुभवति)
कृष् → कर्षति (आकर्षणे)
क्रुश् → क्रोशति (रोदिति)
रुह् → रोहति (वर्धते)
क्षुभ् → क्षोभते (मथनं, क्रोधानुभवनम्)
घुष् → घोषति (शब्दं करोति)
घृष् → घर्षति (घर्षणे)
पुष् → पोषति (पालन–पोषणे)

अत्र न प्रसक्तिः—
१) धातौ स्वरः इक्–प्रत्याहारे च उपधायां च, किन्तु दीर्घः; तत्र गुणः असम्भवः | जीव् (जीवति), क्रीड् (क्रीडति), क्षीव् (क्षीवति), मील् (मीलति) |
२) धातौ स्वरः उपधायां, किन्तु इक् नास्ति; तत्र गुणः असम्भवः | एज् → एजति (एकारः इक्–प्रत्याहारे नास्ति) |
३) धातौ ह्रस्वः इक्–वर्णः अस्ति, किन्तु उपधायां न स्थितः; तत्र गुणः असम्भवः | निन्द् → निन्दति (नकारः उपधा–संज्ञकः; इकारः उपधायां नास्ति); हिंस् → हिंसति (अनुस्वारः उपधायां); भिक्ष् → भिक्षते (ककारः उपधायां); मुण्ड् → मुण्डति (णकारः उपधायां) |

पूर्णसूत्रार्थः—

**पुगन्तलघूपधस्य च** (७.३.८६) = पुगन्तस्य अङ्गस्य लघूपधस्य च इकः गुणः भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | पुक् अन्ते यस्य तत् पुगन्तम्, लघ्वी उपधा यस्य तत् लघूपधम् | पुगन्तञ्च लघूपधञ्च तयोः पुगन्तलघूपधं समाहारद्वन्द्वः, तस्य पुगन्तलघूपधस्य | पुगन्तलघूपधस्य षष्ठ्यन्तं पदम्, च अव्ययपदं, द्विपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः; **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य पूर्णानुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा–सूत्रेण, **इकः** स्थानी भवति यत्र स्थानी नोक्तम् | अनुवृत्ति–सहितसूत्रम्— **पुगन्तलघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः** |

ध्येयं यत् **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति सूत्रस्य अनुवृत्ति–सहितसूत्रम् एवम्— **इकः अङ्गस्य गुणः सार्वधातुकार्धधातुकयोः** | अत्र **इकः अङ्गस्य गुणः** इत्यस्य वदनेन अङ्गस्य अन्ते यः इक्–वर्णः, तस्य गुणः इति अर्थः | तत्र **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन '**इकः अङ्गस्य**' इत्युक्ते न केवलम् इक् इति अङ्गं, किन्तु तादृशम् अङ्गं यस्य अन्ते इक्;

**अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गस्य स्थाने गुणादेशः इति न, अपि तु अङ्गस्य अन्तिमवर्णस्य स्थाने गुणादेशः | किन्तु **पुगन्तलघूपधस्य च** (७.३.८६) इति सूत्रे इकः गुणः अङ्गस्य अन्ते न अपि तु उपधायाम् | एतदर्थं **येन विधिस्तदन्तस्य** (१.१.७२), **अलोऽन्त्यस्य** (१.१.५२) इत्यनयोः प्रसक्तिः नास्ति | अपि च अनुवृत्ति–सहितसूत्रे **अङ्गस्य इकः गुणः** इति अस्ति न तु **इकः अङ्गस्य गुणः** | **पुगन्तलघूपधस्य च** (७.३.८६) इति सूत्रे '**अङ्गस्य**', '**इकः**' अनयोः पदयोः समानाधिकरणं न इष्टम् |

*"पुगन्तस्य" इत्यस्य सूत्रसहितं रूपम्— **पुगन्तस्य अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः** | अनेन केषाञ्चित् विशिष्ट–धातूनाम् अङ्गस्य उपधायां यः इक्–वर्णः, सः लघुः नास्ति चेदपि गुणादेशः भवति | **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ** (७.३.३६) इति सूत्रेण ऋ, ह्री, व्ली, री, क्नूयी, क्ष्मायी इत्येषां धातूनाम्, आकारान्तधातूनां च पुक्–आगमः भवति णिच्–प्रत्यये परे | यथा— दा–धातुः, लटि ददाति → णिचि दापयति | दा + णिच् → अनुबन्धलोपे → दा + इ → पुगागमः → दा + प् + इ → दापि इति णिजन्तधातुः | दापि + शप् + ति → दापयति | एतादृशीषु स्थितिषु धातु–णिच्प्रत्यययोः मध्ये पुक्–आगमः (पुगागमः) भवति | यथा दापि इति धातौ दाप् इति धातोः पुगन्तम् अङ्गम् इति उच्यते | पुक् अन्ते यस्य, तत् पुगन्तम् |

तर्हि णिच्–प्रत्यये परे, आकारान्तधातूनां पुगागमः भवति, यथा दा → दाप् → दापि → दापयति | परन्तु तत्र पुगन्ताङ्गस्य उपधायाम् आकारः (दाप्), अतः गुणकार्यस्य प्रसङ्गः एव नास्ति | किन्तु अन्ये धातवः अपि सूत्रे सूचिताः सन्ति येषां पुगन्ताङ्गस्य उपधायाम् इक्–स्वरः अस्ति, यथा— ऋ, ह्री, व्ली, री | एषां पुगन्तम् अङ्गम्— ऋप्, ह्रीप्, व्लीप्, रीप् | अत्र यद्यपि उपधायां ह्रस्व–इक्–वर्णः (लघूपधा) नास्ति अपि तु दीर्घ–इक्–वर्णः, तथापि **पुगन्तलघूपधस्य च** इत्यनेन पुगन्ताङ्गस्य दीर्घ–इकः गुण–आदेशः भवति — ऋप् → अर्प्, ह्रीप् → ह्रेप्, व्लीप् → व्लेप्, रीप् → रेप् |

लट्–लकारे ऋप् → अर्प् → अर्पि → अर्पयति; ह्रीप् → ह्रेप् → ह्रेपि → ह्रेपयति; व्लीप् → व्लेप् → व्लेपि → व्लेपयति; रीप् → रेप् → रेपि → रेपयति |

**अलोऽन्त्यात् पूर्व उपधा** (१.१.६५) = वर्णसमुदायस्य यः अन्तिमवर्णः, तस्मात् पूर्ववर्णस्य उपधासंज्ञा भवति | संज्ञासूत्रम् | अलः पञ्चम्यन्तम्, अन्त्यात् पञ्चम्यन्तं, पूर्वः प्रथमान्तम्, उपधा प्रथमान्तम्, अनेकपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **अन्त्यात् अलः पूर्व उपधा** |

<u>चुरादिगणे</u>

१) चुरादिगणे **पुगन्तलघूपधस्य च** इति सूत्रस्य प्रसक्तिः | चुर् → चोरयति; तुल् → तोलयति; घुष् → घोषयति; चुद् → चोदयति; विल् → वेलयति |
२) चुरादिगणे धात्वङ्गे **सार्वधातुकार्धधातुकयोः** इति सूत्रस्य प्रसक्तिः अस्ति किन्तु प्राप्तिः न भवति | चुरादिगणे इगन्तधातवः तु सन्ति, परन्तु तत्र इगन्तधातुषु वृद्धिः भवति |

यथा चिञ् चयने इति चुरादिगणीयधातुः—

चि + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धि–आदेशः (न तु गुणः) → चै + इ → सन्धिः (आय्–आदेशः) → चाय् + इ → चायि → चायि + शप् + ति → चाययति

एवमेव प्रेरणार्थे णिच्–प्रत्यये परे—

नी + णिच् → वृद्धि–आदेशः (न तु गुणः) → नै + इ → सन्धिः (आय्–आदेशः) → नाय् + इ → नायि → नायि + शप् + ति → नाययति
भू + णिच् → वृद्धि–आदेशः (न तु गुणः) → भौ + इ → सन्धिः (आव्–आदेशः) → भाव् + इ → भावि → भावि + शप् + ति → भावयति
कृ + णिच् → वृद्धि–आदेशः (न तु गुणः) → कार् + इ → कारि → कारि + शप् + ति → कारयति

तिङन्तप्रकरणे गुण–विधायक–सूत्रद्वयम् अस्ति— **सार्वधातुकार्धधातुकयोः** (७.३.८४), **पुगन्तलघूपधस्य च** (७.३.८६) इति | इदानीं सूत्रद्वयस्य अपि परिचयः जातः |